# वृद्धायाः देशभक्तिः

( चन्द्रा ) निवेदकः १ - एकः ग्रामः। तत्र एका वृद्धा। तस्य चत्वारः पुत्राः। ते सर्वे उत्तमाः।

तेषाम् एषा कथा। एकदा देशस्य उपरि शत्रुः आक्रमणम् करोति।

( गौरी ) निवेदकः २ - पश्यामः।

( श्रीवाणी ) घोषकारः १ - शृण्वन्तु शृण्वन्तु। देशस्य सीमा प्रदेशे भीकरं युद्धं प्रचलति।

शत्रुः प्रबलः अस्ति। बहवः सैनिकाः मृताः। देशस्य रक्षणार्थं सैनिकाः आवश्यकाः।

( सिद्धान्तः ) घोषकारः २ - देशस्य रक्षणार्थं सैनिकाः आवश्यकाः।

वृद्धा - (सखीम्) देशस्य रक्षणार्थं सैनिकाः आवश्यकाः।

( गृहं गच्छति। आसन्दे उपविशति। )

वृद्धा - भोः ज्येष्ठ -

( अनुभवः ) ज्येष्ठः - आम् अम्ब।

वृद्धा - भवान् युद्धार्थं गच्छतु। देशस्य संरक्षणं करोतु।

( अनुभवः ) ज्येष्ठः - आम् अम्ब। अहं युद्धार्थं गच्छामि। ( नमस्करोति )

वृद्धा - विजयी भव।

जनाः - विजयी भव।

( चन्द्रा ) निवेदकः - (कानिचन दिनानन्तरं वार्ताहरः आगच्छति। )

(तेजस्विनी ) वार्ताहरः १ - अम्ब, भवत्याः पुत्रः शूरः। सः उत्तमं युद्धं कृतवान्।

रणाङ्गणे वीरगतिं प्राप्तवान्।

(अम्बा आसन्दे उपविशति। वार्ताहरः निर्गच्छति। )

वृद्धा - भोः वीरेन्द्र -

( कौमुदी ) वीरेन्द्र - आम् अम्ब ।

वृद्धा - भवान् युद्धार्थं गच्छतु । देशस्य संरक्षणं करोतु ।

( कौमुदी ) वीरेन्द्रः - आम् अम्ब । अहं युद्धार्थं गच्छामि । ( नमस्करोति )

वृद्धा - यशस्वी भव ।

जनाः - यशस्वी भव ।

( चन्द्रा ) निवेदकः - (कानिचन दिनानन्तरं वार्ताहरः आगच्छति । )

वार्ताहरः २ - अम्ब, भवत्याः पुत्रः शूरः । सः उत्तमं युद्धं कृतवान् ।

रणाङ्गणे वीरगतिं प्राप्तवान् ।

(अम्बा आसन्दे उपविशति । वार्ताहरः निर्गच्छति । )

वृद्धा - भोः धीरेन्द्र -

( आस्था ) धीरेन्द्र - आम् अम्ब ।

वृद्धा - भवान् युद्धार्थं गच्छतु । देशस्य संरक्षणं करोतु ।

( आस्था ) धीरेन्द्रः - आम् अम्ब । अहं युद्धार्थं गच्छामि । ( नमस्करोति )

वृद्धा - विजयी भव ।

जनाः - विजयी भव ।

( चन्द्रा ) निवेदकः - (कानिचन दिनानन्तरं वार्ताहरः आगच्छति । )

( नितिशा ) वार्ताहरः २ - अम्ब, भवत्याः पुत्रः शूरः । सः उत्तमं युद्धं कृतवान् ।

रणाङ्गणे वीरगतिं प्राप्तवान् ।

(अम्बा आसन्दे उपविशति । वार्ताहरः निर्गच्छति । )

वृद्धा - भोः भरत -

( श्रुती ) भरतः - आम् अम्ब ।

(अक्षरः) जनः १ - अम्ब, चतुर्थं पुत्रं युद्धार्थं मा प्रेषयतु ।

जनः २ - भवती वृद्धा ।

वृद्धकाले साहाय्यार्थम् एकः पुत्रः तु आवश्यकः ।

चतुर्थं पुत्रं युद्धार्थं मा प्रेषयतु ।

जनाः - अम्ब , चतुर्थं पुत्रं युद्धार्थं मा प्रेषयतु ।

वृद्धा - (उत्थाय , निर्धार्य च ) भोः भरत , भवान् युद्धार्थं गच्छतु ।

देशस्य संरक्षणं करोतु ।

( श्रुती ) भरतः - आम् अम्ब । अहं युद्धार्थं गच्छामि । ( नमस्करोति )

वृद्धा - विजयी भव । यशस्वी भव ।

जनाः - (पश्यन्ति ) विजयी भव ।

( चन्द्रा ) निवेदकः - (कानिचन दिनानन्तरं वार्ताहरः आगच्छति । )

( नितिशा ) वार्ताहरः २ - अम्ब, भवत्याः पुत्रः शूरः वीरः । सः उत्तमं युद्धं कृतवान् ।

रणाङ्गणे वीरगतिं प्राप्तवान् ।

(अम्बा आसन्दे उपविशति । दुःखं करोति । )

(अक्षरः) जनः १ - वयम् उक्तवन्तः "चतुर्थं पुत्रं युद्धार्थं मा प्रेषयतु । " इति ।

परन्तु भवती न शृतवती । इदानीं किमर्थं रोदिसि?

( स्मरणा ) जनः २ - इदानीं रोदनेन कः लाभः?

( तेजस्वी ) जनः ३ - इदानीं दुःखेन किं प्रयोजनम् ?

वृद्धा - मम चतुर्थः पुत्रः मृतः अतः अहं न रोदिमि । तत् न मम दुःखम् ।

युद्धार्थं प्रेषयितुं मम पञ्चमः पुत्रः नास्ति खलु , एतत् एव मम दुःखम् ।

(अक्षरः) जनः १ - अम्ब , भवती धन्या ।

जनः २ - अम्ब , भवती धन्या ।

जनः ३ - अम्ब , भवती वीरमाता ।

जनाः - जयतु जयतु वीरमाता ।

गौरी – इदानीं पात्र परिचयः।

( चन्द्रा )

( गौरी )

( श्रीवाणी )

( सिद्धान्तः )

( अनुभवः )

( तेजस्विनी )

(कौमुदी )

( आस्था )

( कीर्ती )

( श्रुती )

(अक्षरः)

( निंतिशा )

( स्मरणा )

( तेजस्वी )